

पञ्चदश अध्यायः

# अस्माकं भूमेः नृत्यानि

एहि, अस्माकं नृत्ययात्राम् आरभामहे! स्वस्य नृत्यघण्टां नोदितुम्, नृत्यस्य जगति निमज्जितुं सिद्धाः भवन्तु!

## *अस्माकं भूमेः नृत्यानि : स्थानीयानां तालानाम् अङ्गभङ्गीनां च अन्वेषणम्*

अयम् अध्यायः मूलतः तेषां नृत्यकौशलानां कृते, यैः अस्माकं देशः रञ्जितः वर्णितः समृद्धश्च अस्ति।

भवतः परितः ये नृत्यरूपाणि सन्ति तानि समीपतः अवलोकयन्तु।

अस्मिन् क्रियाकलापे भवन्तः तादृशानां नृत्यरूपाणां विषये ज्ञास्यन्ति, यानि भवतां परिसरैः सह सम्बद्धानि सन्ति। समृद्धेभ्यः पारम्परिकेभ्यः लोकनृत्येभ्यः स्थानीयानि ऊर्जावन्ति उद्यापनानि - सर्वाः नृत्यकलाः अस्माकं समाजस्य संस्कृत्या सह अत्यन्तं संयुक्ताः सन्ति।

भवतीनां/भवतां परिसरैः सह सम्बद्धानि एतादृशानि नृत्यानि अन्विषन्तु, आत्मानं सज्जीकुर्वन्तु, लयगीतैः सह नृत्यभूमिम् आगत्य प्रस्तुवन्तु, तत् नृत्यञ्च पुनर्जीवयन्तु!

0680CH15

क्रियाकलापः १

## स्थानीयानां नृत्यानाम् अन्वेषणम्

स्वेषां प्रान्तेषु प्रसिद्धानां विविधानां स्थानीयानां नृत्यानां नामानि लिखन्तु। स्वेषां मित्रैः, मातापितृभिः, शिक्षकैश्च सह चर्चयन्तु।

किमप्येकं स्थानीयं नृत्य चिन्वन्तु, तत् स्थानं परिभ्रमन्तु तत्रस्थानां स्थानीयान् कलाकारान् द्रष्टुम्। भवन्तः/भवत्यः तेषां मुद्रितं दृश्यम् (विडिओ) अपि द्रष्टुं प्रभवन्ति।

यदि शक्यते, तर्हि तैः स्थानीयैः कलाकारैः सह एकां क्षुद्रां कार्यशालाम् आयोजयन्तु। अस्य स्थानीयस्य नृत्यस्य का पृष्ठभूमिः, किञ्च उद्देश्यम् इत्यादिकं सर्वं तस्यां कार्यशालायां जानन्तु।

तत्रैव कार्यशालायाम् इदमपि ज्ञातुं शक्नुवन्तु यत् तस्यां स्थानीयायां नृत्यकलायां काः मुद्राः, भावाः, ललितगतयश्च सन्ति इति।

इत्थं प्रकारेण भवत्यः/भवन्तः स्वस्य प्रादेशिकं नृत्यं विस्तृततया सुचारुरीत्या च ज्ञास्यन्ति।

© NCERT not to be republished



गुजरातराज्यस्य गरबा-नृत्यम्



*तालवाद्यम्*



*ढोलकः*



*दाण्डिया-दण्डः*

तादृशानि कानिचन नृत्यानि पश्यन्तु यानि ऊर्जापूर्णानि, गतियुक्तानि, सुन्दरतया आवर्तनयुतानि, भव्यैः पादचालनैः युक्तानि, बहुवर्णरञ्जिताभिः वेशभूषाभिः अलङ्कृतानि, भावलयसम्पन्नानि, सकारात्मकैः चिन्तनैः पूरितानि च सन्ति।

**उदाहरणानि -**

क्षेत्रपरिदर्शनकाले नृत्यरूपस्य आभियान्त्रिकीकरणाय विविधाः पद्धतयः अवलम्ब्यन्ते।

## गुजरातप्रान्तस्य गरबा-नृत्यम्

### क. उपक्रमः

इदं नृत्यं सामान्येन नवरात्रीकाले अनुष्ठीयते यदा भगवत्याः दुर्गायाः आराधना भवति। इदं नृत्यं न नूनं संस्कृतिं परम्परामेव प्रदर्शयति, अपि तु समुदायभावं सङ्गतिम् अपि द्योतयति।

### ख. नृत्याभिवर्णनम्

- स्फूर्तिपूर्णा ऊर्जायुता च गतिः।
- लयात्मिका तालिः।
- एकं केन्द्रं परितः नर्तकाः/नर्तक्यः परिभ्रमणं कृत्वा एकं वृत्ताकारम् आवर्तनं निर्मीयते।

### ग. संगतिः

- पारम्परिकं लोकगीतम्।
- वाद्ययन्त्राणि यथा - ढोलकः (ड्राम्), तालवाद्यम्, दाण्डिया-दण्डम् इत्यादीनि।

### घ. वेषभूषाः

- **स्त्रीणाम्** - *चनिया चोली (घाग्रा)* ।
- **पुंसाम्** - *केदियू-कफ्नी* (धोतवस्त्रस्य कुर्तायाश्च एकः समन्वयः)।

## अन्येषां नृत्यरूपानाम् अन्वेषणम्

अधुना भवन्तः/भवत्यः अस्माकं देशस्य अन्येषां प्रदेशस्थानां स्थानीयानि नृत्यरूपाण्यपि ज्ञातुं शक्नुवन्ति।

अस्यां नृत्ययात्रायां भवन्तः/भवत्यः न केवलम् एकं स्थानीयं नृत्यं ज्ञास्यन्ति, अपि तु सर्वाण्यपि प्रदेशान्तराणि नृत्यरूपाण्यपि ज्ञातुं प्रभविष्यन्ति।

### क्रियाकलापः २

## अन्येषां नृत्यरूपाणाम् अन्वेषणम्

अन्येषां प्रादेशिकानां नृत्यरूपानाम् च मुद्रितानि दृश्यानि (वीडिओ) पश्यन्तु।

एहि, ... एकत्र उपविशामः, अन्यान्यानां प्रदेशस्थानां नृत्यानां विषये आलोचयामश्च।

© NCERT not to be republished

| राज्यम् | नृत्यस्य नाम | सङ्गतिः | वेशभूषा | कदा अनुष्ठीयते? |
|---|---|---|---|---|
| केरलम् | *तिरुवथिरा कलिः (स्त्रीभिः अनुष्ठीयते)* | करतालिभिः लोकगीतैश्च सह छन्दोबद्धं गीतम् | सामान्यं केरलशैल्याः आभूषण् - *मुण्डुः, वेस्थी,* अन्यानि केरलस्थानि स्थानीयाः अलङ्काराश्च | *तिरुवथिरी, शिवरात्रिः, ओनम्* - इत्यादिषु उत्सवेषु |
| ओडिशा | *सैला (स्थानीयाभिः जनजातिभिः अनुष्ठीयते)* | *ढोलः (ड्राम्-सदृशः), नागारा (केटल् - ड्राम्) मुरली* | वर्णयुताः *शाटिकाः धौतवस्त्राणि* च, कणकोषादिभिः धातुभिश्च निर्मिताः जनजातीयाः अलङ्काराः | कृषेः प्रारम्भात् प्राक् अनुष्ठीयमाने *चैत्र-पर्वोत्सवे* |
| काश्मीरः | *रौफः (स्त्रीभिः दलगततया अनुष्ठीयते)* | *तुम्बकनारी* (क्षुद्रः *केटल्-ड्रामः*), *राबाबः (एकम् आतोद्यं यन्त्रम्), संवादिनी (हार्मोनियम्)* | वर्णयुतैः खचितैः वस्त्रैः, आभूषणैः कर्णाभरणैः, गलहारैः कङ्कनैश्च सज्जितानि काश्मीरप्रदेशस्थानि वस्त्राणि (सुदीर्घं, मृदुरूपेण प्रतिबद्धं च) | ईदकाले, *वैशाखी*-उत्सवे, *नवरोज्*-काले, विवाहे, शस्याहरणकाले, अन्येषु सामाजिकेषु संहतिषु च |

अत्र त्रयाणां राज्यानां विषये वर्णनं प्रदत्तम्। इत्थम् अस्माकं देशस्य अवशिष्टानां राज्यानां नृत्यरूपाण्यपि सूचौ स्थापयन्तु।

विविधानां प्रदेशस्थानां नृत्यरूपाणां सूचनां भवन्तः/भवत्यः सारण्या अपि व्यवस्थापयितुं शक्नुवन्ति। अत्यद्भुतम्! बहु शोभनम्। एहि, वयम् अस्माकं नृत्ययात्रायाः अग्रिमं स्तरं प्रति गच्छामः।

© NCERT not to be republished

## प्रादेशिकानां नृत्यरूपाणां तुलना

भवतां/भवतीनाम् अस्यां नृत्ययात्रायां भवतीभिः नैकाः प्रादेशिकाः नृत्यरूपाः दृष्टाः स्युः। अग्रे गत्वा भवन्तः/भवत्यः एकेन स्थानीयेन नृत्यरूपेण सह अन्येषां नृत्यरूपाणां तुलनां कुर्वन्तु।

| राज्यम् | नृत्यस्य नाम | सङ्गतिः | वेशभूषा | नृत्यस्य अवसरः |
|---|---|---|---|---|
| | | | | |
| | | | | |
| | | | | |

© NCERT not to be republished

## क्रियाकलापः ३
## प्रादेशिकानां नृत्यरूपाणां तुलना

चिन्तयन्तु यत् भवन्तः/भवत्यः राजस्थानराज्ये वसन्ति, किञ्च भवद्भिः/भवतीभिः *कालबेलिया*-नृत्यं चितम् अस्ति इति। अधुना अस्य नृत्यस्य

मेघालयस्थेन नोंक्रेम्-नृत्येन सह तुलनां कुर्वन्तु।

| नृत्यरूपम् | कालबेलिया | नोंक्रेम् |
|---|---|---|
| |  |  |
| **राज्यम्** | राजस्थानम् | मेघालयः |
| **वेशभूषा** | स्त्रियः ऊर्ध्वे शरीरे वस्त्रं (*अंग्राखी*), शिरसि च वस्त्रं (*ओढ़नी*) धरन्ति, अधोदेहे च लघुदर्पणकणैः शोभितं वस्त्रं (*लेहेंगा*) धरन्ति। | स्त्रियः पारम्परिकं वेशं धरन्ति, परन्तु पुरुषाः प्रायः विविधवर्णयुतानि वस्त्राणि, हस्ते कृपाणः, शिरसि च श्वेतयाककेशविस्कं धरन्ति। |
| **उद्देश्यम्** | स्थानीयोपचारैः सम्बद्धमिदं नृत्यम्। कदाचित् पौराणिकी कथा अपि प्रदर्श्यते। *होलीकाले* विशिष्टं नृत्यं प्रदर्श्यते। | शरदृतौ अनुष्ठीयते। अनेन नृत्येन शक्तिमत्यः देवताः स्तूयन्ते येन शस्योत्पादनं सुष्ठु भवेत्, जनाश्च समृद्धाः स्युः। |
| **कलाकाराः** | स्त्रियः नृत्यन्ति, पुरुषाश्च गायन्ति | उभे स्त्रीपुरुषे नृत्यन्ति। |
| **सङ्गीतिः** | पारम्परिकानि लोकगीतानि गीयन्ते। तेन सह सङ्गतौ काष्ठनिर्मितानि वाद्यानि उपयुज्यन्ते, यथा - पुंगी, मञ्जीरावाद्यम्, *डाफ्ली*, *बीनः*, *कञ्जीरा* इत्यादीनि। | पारम्परिकानि गीतानि गीयन्ते। तेन सह तालवाद्यम् (ड्राम्), सुषिरवाद्यं (*तांमुरी*) इत्यादीनि व्यवहृयन्ते। |

© NCERT not to be republished

अधः यथा दर्शितं तदनुसृत्य एकां तुलनात्मिकां सरणीं निर्मान्तु -

| नृत्य रूप | | |
|---|---|---|
| राज्यम् | | |
| वेशभूषा | | |
| उद्देश्यम् | | |
| कलाकाराः | | |
| सङ्गतिः | | |

© NCERT not to be republished

## क्रियाकलापः ४
# प्रादेशिकानां नृत्यरूपाणाम् उपरि परियोजना

किं भवन्तः/भवत्यः स्मरन्ति यत् प्रथमे कार्यकलापे एकं स्थानभ्रमणं जातं प्रादेशिकानां नृत्यरूपाणाम् अध्ययनाय?

चित्राणि अङ्कयित्वा, अन्तर्जालात् स्वीकृत्य वा प्रादेशिकानां नृत्यानाम् उपरि एकां परियोजनां निर्मान्तु। तन्नृत्यसम्बद्धम् एकं गीतं चिन्वन्तु, तस्य स्वरलिपिं च लिखन्तु। तेन नृत्येन सह यानि हस्तनिर्मितानि आभरणानि सम्बद्धानि भवन्ति, तानि स्वीकुर्वन्तु।

अन्ते, सर्वेषां शिक्षकाणां मित्राणां च सविधे तां परियोजनां प्रस्तुवन्तु।



## क्रियाकलापः ५
## प्रसिद्धानां नर्तकीनां नर्तकानां च उपरि टिप्पण्यः

स्वस्य इच्छानुसारम् अद्यतने काले भारतीयनृत्ये प्रख्यातानां नर्तकीनां नर्तकानां च उपरि एकां टिप्पणीं लिखन्तु। स्वभाषया रचनात्मकतया चित्राणि च संयोज्य टिप्पणीं निर्मान्तु। तेन सह कस्याश्चित् एकस्याः नर्तक्याः नृत्यशैलीं, भङ्गिमां, उपस्थापनं च अधीतुं प्रयत्नं कुर्वन्तु।

© NCERT not to be republished